IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# संस्कृतवाङ्मये पुत्रकामेष्ठियागस्य वैशिष्ट्यम्

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**संस्कृतवाङ्मयपरिचयः**

संस्कृतवाङ्मयं हि विश्ववाङ्मयसमुदाये मूर्धन्यमिति ज्ञातपूर्वमेव। अस्य हि विस्तृतं सुसद्धं च सर्वाङ्गपूर्णं कलेवरं सर्वानपि विस्मापयतीति नैवात्युक्तिः। वाङ्मयमिदं वैदिकलौकिकभेदेन द्विविधं भवति। अस्य वाङ्मयस्य त्रैविध्यमप्यामनन्ति पण्डिताः प्रभुसम्मिताः वेदाः सुहृत्सम्मितानि इतिहासपुराणानि, कान्तासम्मितानि काव्यानीति। वैदिकवाङ्मये वेदाः, पुराणानि, उपनिषदः, ब्रह्मसूत्राणि अन्तर्भवन्ति। लौकिकवाङ्मये तु काव्यान्येवान्तर्भवन्ति।

**यज्ञप्रस्तावना**

भारतं यज्ञभूमिरिति विख्यातम्। सहस्रेभ्यः वर्षेभ्यः प्राचीनाः विविधप्रयोजनानि अभिलक्ष्य वर्णाश्रमधर्मानुसारेण वेदोपदिष्टनियमान् अनुपालयन्तः यज्ञाः निर्वहन्ति स्म। इतिहासग्रन्थेषु विशिष्य रामायणे दशरथेन कृतः पुत्रकामेष्ठियागः, श्रीरामेणाचरित अश्वमेधयागः, महाभारते युधिष्ठिरेण आयोजितः राजसूययागश्च प्रसिद्धा एwa। एतदतिरिच्य सोमयागः, श्येनयागः, वाजपेययागः, अग्निष्ठोमयागाः प्रसिद्धा एव। यद्यपि यज्ञकर्मसु आधुनिके काले अतीव विरला एव प्रवर्तन्ते तथापि इतिहासपुराणेषु तेषामुल्लेखः विस्तारतया प्राप्यते।

**यज्ञस्य स्वरूपम्**

वैदिकविधानेन हवन – पूजा – मन्त्रोच्चारणयुक्तः लोकहिताय क्रियमाणा पूजा एव यज्ञमित्यभिधीयते। यज्ञः देवमानवयोर्मध्ये सम्बन्धस्थापनमार्गमिति कथ्यन्ते। अग्निदेवस्य स्तुत्या यज्ञः प्रारभ्यते।

**यज्ञपदव्युत्पत्तिः**

इज्यन्ते देवता अत्र इति यज देवपूजादौ नङ् प्रत्यये यज्ञः इति शब्दः सिद्ध्यति। यज्ञः एव सर्वकर्मश्रेष्ठ इति ब्राह्मणग्रन्थेषूक्तम्।

**संस्कृतवाङ्मये यज्ञप्रस्तावना**

श्रीमद्रामायणे दशरथः अनपत्यकारणात् ऋष्यश्रुङ्गमाहूय प्रथमं अश्वमेधम् अनन्तरं पुत्रकामेष्ठियागञ्चाकरोत्। तत्फलमेव रामलक्ष्मणादीनां जननम्। युद्धकाण्डेऽपि श्रीरामः अश्वमेधयागमाचरितवान्।

महाभारते युधिष्ठिरः स्वजीवनकाले यागद्वयं समाचचार। द्यूतक्रीडात् पूर्वं युधिष्ठिरः राजसूययागं कृत्वा सिंहासनमारूढवान्। तत्पश्चात् महाभारतयुद्धानन्तरं अश्वमेधयागमकरोत्।

भगवद्गीतायां श्रीकृष्णः अज्ञानस्य बलिदानमेव निजज्ञानयज्ञमिति उद्घोषयामास। यज्ञोऽयं सर्वश्रेष्ठतम इति सर्वे आमनन्ति।

श्रीमद्भागवतमहापुराणे यज्ञस्य महत्त्वं विस्तारपूर्वकं प्रतिपादितमस्ति। सृष्टेः प्रारम्भः यज्ञादेव सम्भूतमिति ब्रह्मणोक्तमासीत्।

**यदास्य नाभ्यां नलिनादहमासं महात्मनः।**
**नाविदं यज्ञ संभारान्पुरुषा वयवाहते।।**
**तेषु यज्ञस्य पशवः सवनस्पतयः कुशा।**
**इदं च देवयजनं कालञ्चो सगुणान्वितः।।**[1]

1. श्रीमद्भागवतं – स्क-2, अ-6, श्लो- 22,23

ब्रह्मणः नाभिकमलात् भगवान् आविर्बभूव। तदा ब्रह्मा तस्य पुरुषस्य अवयवैस्सह यज्ञस्य भूमिं सामग्रीञ्चासृजत्। ओषधयः, धातु, मृत्तिका, मधुरं, स्वर्णं, घृतादिकं विराट् पुरुषस्य शरीरावयवादागता इति तत्पश्चात् ऋक्, यजु, साम, अथर्ववेदाः, जलं, ब्राह्मणाः आविर्भूता इति कारणात् विराट्पुरुष एव यज्ञपुरुष इति यज्ञस्य श्रेष्ठत्वमागतम्। भागवतस्य चतुर्थस्कन्धे सप्तमाध्याये दक्षयज्ञे सती निधना सति ईश्वरं क्षमां याचयित्वा दक्षः यज्ञसमाप्तिमाचरितवान्। वेनराजोऽपि यज्ञं कृतवानिति सर्वे लोकाः, देवताः यज्ञे निवसन्तीति भागवतपुराणवचनम्। पृथुमहाराजः शताश्वमेधयागान् अकरोत्। ऋषभदेवस्य पुत्रः भरतः भारतभूमिं तपोभूमिमकरोत्। अयं भरतः शताधिकाश्वमेधयागान् अकरोत्। बलिराजोऽपि विश्वजिद्यागं कृतवान्। काशीनरेशस्य पुत्रः सुदक्षिणः दक्षिणाग्नियागं समाचचार।

कूर्मपुराणस्य पूर्वार्धे यज्ञप्रस्तावना एवमस्ति – स्वयं दैत्यराजः बलिचक्रवर्तिः यज्ञेन यज्ञस्वरूपं विष्णुं पूजयामास। ब्राह्मणेभ्यः पुष्कल धनं दत्वा यज्ञमकरोत्। भारद्वाजकथनेन भगवान् विष्णुः वामनरूपधारणं कृत्वा यज्ञप्रदेशम् आजगाम। यज्ञकारणादेव विष्णुरपि अभ्यागतरूपेण दैत्यराजनिकटमागतवानिति यज्ञवैशिष्ट्यं द्योतते –

**ततः कालेन बलिवैरोचनिः सर्वगम्।**
**यज्ञैर्यजेश्वरं विष्णुमर्चयामास सर्वगम्।।**[1]

शिवमहापुराणे द्वितीयरुद्रसंहितायां युद्धखण्डे यज्ञस्य प्रस्तावना – त्रिपुरासुरः तस्यापत्यानि शिवानुग्रहेण अजेयाः जाताः। यज्ञमकृत्वा देवानां समीपस्थं हविर्भागमपि परिगृह्य सुखेन जीवन्ति स्म। शिवस्तु स्वयं भक्तरक्षकः न शिक्षक एव। अतः शिवः देवान् विष्णुसमीपं प्रेषयामास। तदा विष्णुः देवानुद्दिश्य यज्ञं कृत्वा परमेश्वरस्य अनुग्रहेणैव त्रिपुरासुरस्य विनाशो संभविष्यतीत्यवोचत् –

**अच्युतस्य वचः श्रुत्वा वेददेवस्य धीमतः।**
**प्रेम्णां ते प्रणतिं कृत्वा यज्ञेशं तेऽस्तु वान्सुराः।।**[2]

यज्ञसमाप्त्यनन्तरं यज्ञकुण्डात् सहस्रहस्तैः शूल – शक्ति – गदा – चाप – शिलादिभिः सम्भूतः एकः विभिन्नवेषधारी, कालाग्निरुद्रसदृशः प्रादुर्भूतः। विष्णोः आदेशानुसारेण सर्वे युद्धाय संसिद्धाः। एवं त्रिपुरासुरविनाशः सञ्जातः।

नारदपुराणे यज्ञस्य प्रस्तावना – बलिमहाराजः सङ्ग्रामे सर्वान् देवान् जितवान्। तत्पश्चात् –

**बुभुजे व्याहतैश्वर्य प्रबृद्ध श्रीर्महाबलः।**
**इयाज चाश्वमेधैः स प्रीणन तत्परः।।**[3]

विश्वजिद्यागं कृत्वा बलिः इन्द्रपदवीमारूढवान्। अव्याहतैश्वर्यवृद्ध्या त्रिलोकभोगान् अनुभवन् राज्यं पालयति स्म। भगवत्प्रीत्यर्थं बलिः अनेकान् अश्वमेधयज्ञान् कृतवान्।

महाराजः बाहुरपि सप्तद्वीपेषु सप्तयज्ञान् कृतवान्। अस्य परिपालनाकाले यज्ञमहिमा अतिविशिष्टा आसीत्। यज्ञमहिम्ना विनाऽऽरोपणेन अन्नस्योद्भवः फलपुष्पाणां समुद्भवश्च सम्भवति स्म।

भविष्यपुराणे यज्ञस्य प्रस्तावना – च्यवनमहर्षिः अश्विनीकुमारयज्ञं कृत्वा देवलोके सुरदुर्लभैश्वर्यं प्राप्तवान्।

**यज्ञभागे प्रवर्त्ततु शास्त्रोक्ते तु विधानतः**
**आगतावश्विनौ तत्र आहूतौ च्यवनेनतु।।**[4]

ब्रह्मपुराणे यज्ञस्य प्रस्तवना – शुक्राचार्यः बलिद्वारा यज्ञं अकारयत्। तस्मात् विश्वजिद्यागात् अग्निदेवः प्रत्यक्षीभूत्वा बलिमहाराजाय अश्वयुक्तरथं, दिव्यधनुषं, अमेद्यकवचञ्च वररूपेण प्रददात्। रथमारुह्य बलिः स्वर्गलोकं जगाम। बलिमहाराजस्य प्रकाशमानं तेजमसहमानाः देवताः बृहस्पतेः आदेशानुसारेण स्वर्गात् दूरं गताः। बलिः सहस्रसंख्याकयज्ञान् कृत्वा दुर्जेयो जातः।

ब्रह्माण्डपुराणे पूर्वभागे यज्ञस्य प्रस्तावना – राजा नहुषः स्वपूर्वजाननुसृत्य अनेकयज्ञान् समाचरित्वा अवभृथस्नानं कृतवान्। यज्ञकरणेन नहुषः श्रेष्ठः, शान्तः, ब्रह्मवित् च जातः। आयुर्वृद्धिः जाता। ब्रह्मचर्यपालनेन पृथिवी अपि वात्सल्यमयी सञ्जाता।

**नहुषस्य महात्मनः पितरं यं प्रचक्षते।**
**पतेष्ववभृथेप्येव धर्मशीलो महीपतिः।।**
**आयुराचभवायाग्र यमस्मिन् सत्रे नरोत्तमः।**
**शान्तयित्वा तु राजानं तदा ब्रह्मविदस्तथा।।**[5]

---

1. कूर्मपुराणं – पूर्वार्धं – अ – 17-46
2. शिवपुराणं – द्वितीयरुद्रसंहिता – युद्धखंड – अ. 2 - 26
3. नारदपुराणम् – अ – 10- श्लो - 31
4. भविष्यपुराणं – अ-19, श्लो-66
5. ब्रह्माण्डपुराणं – पूर्वभाग – 2-24,25

मार्कण्डेयपुराणे यज्ञसम्बद्धानेकविवरणानि वर्णनानि चोपलभ्यन्ते। इन्द्रद्युम्नस्य समीपे इन्द्रनीलमणिनिर्मिता मूल्यवती प्रतिमाऽऽसीत्। प्रतिमा निर्गतेति इन्द्रद्युम्नः चिन्तामग्नस्सन् मरणावस्थायां गतः। पण्डिताः दुःखनिवृत्त्यर्थं यज्ञमकारयन्। यज्ञस्य फलस्वरूपा सा प्रतिमा अनायासेन पुनः इन्द्रद्युम्नेन प्राप्ता।

स्वायम्भुवमन्वन्तरकल्पारम्भे प्रथममन्वन्तरे देवताः अनाहारात् क्षीणत्वं गताः। ते अतीव दुर्बलाः जाताः। तदा महर्षिः रुचिः पन्त्या आकूत्या प्रत्यक्षो बभूव। अग्निहोत्रस्य स्थापनाञ्च अकरोत्। अनेनैव अस्य यज्ञस्य अग्निहोत्रयज्ञः इति नाम सञ्जातः। यज्ञात् देवाः बलं प्राप्य पुनः त्रिलोकान् कल्याणमयेन पालयामासुः।

गर्गसंहितायां तृणावर्तस्य रक्षसस्य निर्धनान्तरं तस्य शरीरशृङ्गकारणात् श्रीकृष्णः मूर्च्छितो जातः। नन्दः यशोदायाः समीपमानीत्वा प्राणरक्षणार्थं यज्ञकरणमावश्यमिति सूचितवान्। तदा यज्ञकर्ता यशोदामाश्वासयन् यज्ञद्वारा प्राणरक्षां करिष्यामीति यज्ञमकरोत् -

**मा शोकं कुरु हे नन्द हे यशोदे व्रजेश्वरी।**
**करिष्यामि शिशो रक्षां चिरजीवी भवेदयम्।।**[1]

एवं प्रकारेण संस्कृतवाङ्मये अनेकत्र यज्ञसम्बन्धविषयाः उल्लिखिताः वर्तन्ते। परन्तु पुत्रकामेष्टियागस्य विवरणं केवलं रामायणे एवं दृश्यते।

**पुत्रकामेष्ठियज्ञस्य विवरणम्**

पुत्रकामेष्ठियागः एकः पवित्रवैदिकानुष्ठानं भवति। कुटुम्बे सन्तत्यभावकारणात् देवतानामाशीर्वादानुग्रहप्राप्त्यर्थं राजानः कुर्वन्ति स्म।

**पुत्रकामेष्ठियज्ञस्य महत्त्वम्**

सन्तानरहितदम्पतीनां कृते अत्यन्तमहत्त्वपूर्ण यागः भवति पुत्रकामेष्ठियागः। अनेन यज्ञकरणेन सुखमयजीवनं, सन्तानञ्च देवताः अनुगृह्णन्तीति विश्वासः। यज्ञकरणात् पूर्वं केचन विषयाः स्वीकरणीयाः –

1. अनुष्ठानाय वैदिकशास्त्रपारङ्गतः पण्डितः अपेक्षितः।
2. अनुष्ठानसमये आवश्यकसामग्री यथा घृतं, धान्यं, फलप्रसादाः शुद्धरूपेण स्थापनीया।
3. यस्मिन् स्थाने अनुष्ठानं क्रियते तत् स्थानं स्वच्छं तथा शुद्धञ्च भवेत्।
4. अनुष्ठानात्पूर्वं शरीरं मनश्च शुद्धं भवेताम्। स्नानकरणं, शुभ्रवस्त्रधारणमनिवार्यमेव।
5. अनुष्ठानात्पूर्वं शुद्धशाकाहारग्रहणं करणीयम्। मांसाहारं, मद्यपानसेवनं निषिद्धमेव।
6. अनुष्ठानात्पूर्वं देवतानां पूजा, गुरूणामनुग्रहः अनिवार्यमेव।
   उपर्युक्त नियमपालनेन स्वस्थसन्तानं सुखमयजीवनञ्च लभन्ते।

**पुत्रकामेष्ठियज्ञस्य विधिः**

पुत्रकामेष्ठियज्ञः निम्नलिखितप्रकारेण करणीयः -

1. प्रप्रथमं यज्ञाय यज्ञकुण्डनिर्माणं करणीयम्। तदर्थम् आवश्यकसामग्री संकलय्य स्थापनीयम्।
2. तत्पश्चात् पण्डितः गणेशस्य पूजा कृत्वा बाधानिवारणाय गणेशप्रार्थना करोति। यज्ञानुष्ठानं निर्विघ्नतया समाप्त्यर्थं प्रप्रथमं गणेशपूजा अनिवार्या।
3. तत्पश्चात् वैदिकमन्त्रोच्चारणैस्सह घृतादिकं, पवित्रहोमपदार्थान् अग्नौ स्थापनीयम्।
4. तत्पश्चात् पण्डितः मन्त्रोच्चारणेन आहुतिं ददाति, तस्मिन् धान्य, फल – प्रसादाः स्थापनीयाः।
5. आहुतेः पश्चात् पण्डितः अग्निशमनाय यज्ञकुण्डे जलं प्रक्षिपेत्।
6. अन्तिमे प्रसादवितरणं, तत् देवताभ्यः दीयमानं पवित्रभोजनं भवति। प्रसादमिदं यज्ञप्रतिभागिनः स्वीकुर्वन्ति अत्र देवतानां अनुग्रहरूपेण प्रसादमिदं आमनन्ति च। एवं प्रकारेण यागः परिसमाप्यते।

**उपसंहारः**

वैदिककालादारभ्य यज्ञानां वैशिष्ट्यं गरीयसी। देवताः, राक्षसाः, मुनयः, राजानश्च यज्ञान् समाचरित्वा विशेषफलं प्राप्तवन्तः। अतः यज्ञः सर्वश्रेष्ठकर्म इति कथने नास्त्यतिशयोक्तिः।

**आधारग्रन्थाः**

1. श्रीमद्रामायणम् – वाल्मीकिमहर्षिः, M.L.J. प्रेस्, प्रैवेट् लिमिटेड्, मद्रास्।
2. महाभारतम् – वेदव्यासमहर्षिः, गीताप्रेस्, गोरखपूर।
3. भागवतपुराणम् – वेदव्यासः, चौखम्बासंस्कृतप्रतिष्ठान्, दिल्ली।
4. ब्रह्मपुराणम् – व्यासमहर्षिः, गीताप्रेस्, गोरखपूर।
5. ब्रह्माण्डपुराणम् –व्यासमहर्षिः, गीताप्रेस्, गोरखपूर।
6. भविष्यपुराणम् – व्यासमहर्षिः, गीताप्रेस्, गोरखपूर।
7. कूर्मपुराणम् – के.वी. शर्मा, कृष्णदास अकाडमी, वारणासी।
8. मार्कण्डेयपुराणम् – व्यासमहर्षिः, गीताप्रेस्, गोरखपूर।
9. नारदपुराणम् – व्यासमहर्षिः, गीताप्रेस्, गोरखपूर।
10. गर्गसंहिता – चौखम्बासंस्कृतसंस्थान, वारणसी।

1. गर्गसंहिता – गोखण्डं – अ. 14, श्लोक - 50